Venkateswara Suprabhatam

श्रीवेङ्कटेशसुप्रभातम्

SUPRABHATAM · श्रीवेङ्कटेशसुप्रभातम्

1

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥

Kausalya supraja Rama purva sandhya pravartate
Uttishtha nara shardula kartavyam daivam ahnikam.

2

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥

Uttishthottishtha Govinda uttishtha garuda dhvaja.
Uttishtha kamala kanta trailokyam mangalam kuru.

3

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहारिणि मनोहरदिव्यरूपे ।
श्रीस्वामिनि श्रितजनप्रियदानशीले
श्रीवेङ्कटेशदयिते तव सुप्रभातम् ॥

Matas samasta jagatam Madhu Kaitabhareh
Vakshoviharini manohara divya rupe.
Shri svamini shrita jana priya dana shile
Shri Venkatesha dayite tava suprabhatam.

4

तव सुप्रभातमरविन्दलोचने
भवतु प्रसन्नमुखचन्द्रमण्डले ।
विधिशङ्करेन्द्रवनिताभिरर्चिते
वृषशैलनाथदयिते दयानिधे ॥

Tava suprabhatam aravinda lochane
Bhavatu prasanna mukha chandra mandale.
Vidhi Shankarendra vanitabhir archite
Vrisha shaila natha dayite dayanidhe.

5

अत्र्यादिसप्तऋषयस्समुपास्य सन्ध्यां
आकाशसिन्धुकमलानि मनोहराणि ।
आदाय पादयुगमर्चयितुं प्रपन्नाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Atryadi sapta rishayas samupasya sandhyam
Akasha sindhu kamalani manoharani.
Adaya pada yugam archayitum prapannah
Sheshadri shekhara vibho tava suprabhatam.

6 पञ्चाननाब्जभवषण्मुखवासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवन्ति ।
भाषापतिः पठति वासरशुद्धिमारात्
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Panchananabja bhava shanmukha vasavadyah
Traivikramadi charitam vibudhah stuvanti.
Bhasha patih pathati vasara shuddhim arat
Sheshadri shekhara vibho tava suprabhatam.

7 ईषत्प्रफुल्लसरसीरुहनारिकेल-
पूगद्रुमादिसुमनोहरपालिकानाम् ।
आवाति मन्दमनिलस्सह दिव्यगन्धैः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Ishat praphulla sarasiruha narikela-
Puga drumadi sumanohara palikanam.
Avati mandam anilas saha divya gandhaih
Sheshadri shekhara vibho tava suprabhatam.

8 उन्मील्य नेत्रयुगमुत्तमपञ्जरस्थाः
पात्रावशिष्टकदलीफलपायसानि ।
भुक्त्वा सलीलमथ केलिशुकाः पठन्ति
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Unmilya netra yugam uttama panjarasthah
Patravashishta kadali phala payasani.
Bhuktva salilam atha keli shukah pathanti
Sheshadri shekhara vibho tava suprabhatam.

9 तन्त्रीप्रकर्षमधुरस्वनया विपञ्च्या
गायत्यनन्तचरितं तव नारदोऽपि ।
भाषासमग्रमसकृत्करचारुरम्यं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Tantri prakarsha madhura svanaya vipanchya
Gayaty ananta charitam tava Naradopi.
Bhasha samagram asakrit kara charu ramyam
Sheshadri shekhara vibho tava suprabhatam.

10 भृङ्गावली च मकरन्दरसानुविद्ध-
झङ्कारगीतनिनदैस्सह सेवनाय ।
निर्यात्युपान्तसरसीकमलोदरेभ्यः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Bhringavali cha makaranda rasanuviddha-
Jhankara gita ninadais saha sevanaya.
Niryaty upanta sarasi kamalodarebhyah
Sheshadri shekhara vibho tava suprabhatam.

11 योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमन्थनतीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुम्भाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Yosha ganena vara dadhni vimathyamane
Ghoshalayeshu dadhi manthana tivra ghoshah.
Roshat kalim vidadhate kakubhash cha kumbhah
Sheshadri shekhara vibho tava suprabhatam.

12 पद्मेशमित्रशतपत्रगतालिवर्गाः
हर्तुं श्रियं कुवलयस्य निजाङ्गलक्ष्म्या ।
भेरीनिनादमिव बिभ्रति तीव्रनादं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥

Padmesha mitra shatapatra gatali vargah
Hartum shriyam kuvalayasya nijanga lakshmya.
Bheri ninadam iva bibhrati tivra nadam
Sheshadri shekhara vibho tava suprabhatam.

13 श्रीमन्नभीष्टवरदाखिललोकबन्धो
श्रीश्रीनिवास जगदेकदयैकसिन्धो ।
श्रीदेवतागृहभुजान्तरदिव्यमूर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Shrimann abhishta varadakhila loka bandho
Shri Shrinivasa jagad eka dayaika sindho.
Shri devata griha bhujantara divya murte
Shri Venkatachala pate tava suprabhatam.

14 श्रीस्वामिपुष्करिणिकाऽऽप्लवनिर्मलाङ्गाः
श्रेयोऽर्थिनो हरविरिञ्चसनन्दनाद्याः ।
द्वारे वसन्ति वरवेत्रहतोत्तमाङ्गाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Shri svami pushkarinika plava nirmalangah
Shreyorthino Hara Virincha Sanandanadyah.
Dvare vasanti vara vetra hatottamangah
Shri Venkatachala pate tava suprabhatam.

15 श्रीशेषशैलगरुडाचलवेङ्कटाद्रि-
नारायणाद्रिवृषभाद्रिवृषाद्रिमुख्याम् ।
आख्यां त्वदीयवसतेरनिशं वदन्ति
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Shri Sheshashaila Garudachala Venkatadri-
Narayanadri Vrishabhadri Vrishadri mukhyam.
Akhyam tvadiya vasater anisham vadanti
Shri Venkatachala pate tava suprabhatam.

16 सेवापराश्शिवसुरेशकृशानुधर्म-
रक्षोऽम्बुनाथपवमानधनाधिनाथाः ।
बद्धाञ्जलिप्रविलसन्निजशीर्षदेशाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Seva parash Shiva suresha krishanu dharma-
Rakshombu natha pavamana dhanadhinathah.
Baddhanjali pravilasan nija shirsha deshah
Shri Venkatachala pate tava suprabhatam.

17 धाटीषु ते विहगराजमृगाधिराज-
नागाधिराजगजराजहयाधिराजाः ।
स्वस्वाधिकारमहिमाधिकमर्थयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Dhatishu te vihaga raja mrigadhiraja-
Nagadhiraja gajaraja hayadhirajah.
Sva svadhikara mahimadhikam arthayante
Shri Venkatachala pate tava suprabhatam.

18 सूर्येन्दुभौमबुधवाक्पतिकाव्यसौरि-
स्वर्भानुकेतुदिविषत्परिषत्प्रधानाः ।
त्वद्दासदासचरमावधिदासदासाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Suryendu bhauma budha vakpati kavya sauri-
Svarbhanu ketu divishat parishat pradhanah.
Tvad dasa dasa charamavadhi dasa dasah
Shri Venkatachala pate tava suprabhatam.

19 त्वत्पादधूलिभरितस्फुरितोत्तमाङ्गाः
स्वर्गापवर्गनिरपेक्षनिजान्तरङ्गाः ।
कल्पागमाकलनयाऽऽकुलतां लभन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Tvat pada dhuli bharita sphuritottamangah
Svargapavarga nirapeksha nijantarangah.
Kalpagamakalanaya kulatam labhante
Shri Venkatachala pate tava suprabhatam.

20 त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयन्तः ।
मर्त्या मनुष्यभुवने मतिमाश्रयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Tvad gopuragra shikharani nirikshamanah
Svargapavarga padavim paramam shrayantah.
Martya manushya bhuvane matim ashrayante
Shri Venkatachala pate tava suprabhatam.

21 श्रीभूमिनायक दयादिगुणामृताब्धे
देवाधिदेव जगदेकशरण्यमूर्ते ।
श्रीमन्ननन्तगरुडादिभिरर्चिताङ्घ्रे
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Shri bhumi nayaka dayadi gunamritabdhe
Devadhideva jagad eka sharanya murte.
Shrimann ananta garudadibhir architanghre
Shri Venkatachala pate tava suprabhatam.

22 श्रीपद्मनाभ पुरुषोत्तम वासुदेव
वैकुण्ठ माधव जनार्दन चक्रपाणे ।
श्रीवत्सचिह्न शरणागतपारिजात
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Shri Padmanabha Purushottama Vasudeva
Vaikuntha Madhava Janardana Chakrapane.
Shrivatsa chihna sharanagata parijata
Shri Venkatachala pate tava suprabhatam.

23 कन्दर्पदर्पहरसुन्दरदिव्यमूर्ते
कान्ताकुचाम्बुरुहकुड्मललोलदृष्टे ।
कल्याणनिर्मलगुणाकरदिव्यकीर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Kandarpa darpa hara sundara divya murte
Kanta kuchamburuha kudmala lola drishte.
Kalyana nirmala gunakara divya kirte
Shri Venkatachala pate tava suprabhatam.

24 मीनाकृते कमठकोलनृसिंहवर्णिन्
स्वामिन् परश्वथतपोधन रामचन्द्र ।
शेषांशराम यदुनन्दन कल्किरूप
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Minakrite kamatha kola nrisinha varnin
Svamin parashvatha tapodhana Ramachandra.
Sheshansha Rama Yadunandana Kalki rupa
Shri Venkatachala pate tava suprabhatam.

25 एलालवङ्गघनसारसुगन्धतीर्थं
दिव्यं वियत्सरिति हेमघटेषु पूर्णम् ।
धृत्वाऽद्य वैदिकशिखामणयः प्रहृष्टाः
तिष्ठन्ति वेङ्कटपते तव सुप्रभातम् ॥

Ela lavanga ghanasara sugandha tirtham
Divyam viyat sariti hema ghateshu purnam.
Dhritvadya vaidika shikhamanayah prahrishtah
Tishthanti Venkata pate tava suprabhatam.

26 भास्वानुदेति विकचानि सरोरुहाणि
संपूरयन्ति निनदैः ककुभो विहङ्गाः ।
श्रीवैष्णवास्सततमर्थितमङ्गलास्ते
धामाश्रयन्ति तव वेङ्कट सुप्रभातम् ॥

Bhasvan udeti vikachani saroruhani
Sampurayanti ninadaih kakubho vihangah.
Shri Vaishnavas satatam arthita mangalas te
Dhamashrayanti tava Venkata suprabhatam.

27 ब्रह्मादयस्सुरवरास्समहर्षयस्ते
सन्तस्सनन्दनमुखास्तव योगिवर्याः ।
धामान्तिके तव हि मङ्गलवस्तुहस्ताः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Brahmadayas suravaras samaharshayas te
Santas Sanandana mukhas tava yogi varyah.
Dhamantike tava hi mangala vastu hastah
Shri Venkatachala pate tava suprabhatam.

28 लक्ष्मीनिवास निरवद्यगुणैकसिन्धो
संसारसागरसमुत्तरणैकसेतो ।
वेदान्तवेद्य निजवैभव भक्तभोग्य
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥

Lakshmi nivasa niravadya gunaika sindho
Sansara sagara samuttaranaika seto.
Vedanta vedya nija vaibhava bhakta bhogya
Shri Venkatachala pate tava suprabhatam.

29 इत्थं वृषाचलपतेरिह सुप्रभातम्
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरङ्गभाजां
प्रज्ञां परार्थसुलभां परमां प्रसूते ॥

Ittham Vrishachala pater iha suprabhatam
Ye manavah pratidinam pathitum pravrittah.
Tesham prabhata samaye smritir anga bhajam
Prajnam parartha sulabham paramam prasute.

1

कमलाकुचचूचुककुङ्कुमतो
नियतारुणितातुलनीलतनो
कमलायतलोचन लोकपते
विजयीभव वेङ्कटशैलपते ॥

Kamala kucha chuchuka kunkumato
Niyatarunitatula nila tano
Kamalayata lochana loka pate
Vijayi bhava Venkata shaila pate.

2

सचतुर्मुखषण्मुखपञ्चमुख-
प्रमुखाखिलदैवतमौलिमणे ।
शरणागतवत्सल सारनिधे
परिपालय मां वृषशैलपते ॥

Sa chaturmukha shanmukha panchamukha-
Pramukhakhila daivata mauli mane.
Sharanagata vatsala sara nidhe
Paripalaya mam Vrisha shaila pate.

3

अतिवेलतया तव दुर्विषहै-
रनुवेलकृतैरपराधशतैः ।
भरितं त्वरितं वृषशैलपते
परया कृपया परिपाहि हरे ॥

Ativelataya tava durvishahai-
Ranuvela kritair aparadha shataih.
Bharitam tvaritam Vrisha shaila pate
Paraya kripaya paripahi Hare.

4

अधिवेङ्कटशैलमुदारमते-
र्जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः
कमलादयितान्न परं कलये ॥

Adhi Venkata shailam udara mate-
Rjanatabhimatadhika dana ratat.
Para devataya gaditan nigamaih
Kamala dayitan na param kalaye.

5 कलवेणुरवावशगोपवधू-
शतकोटिवृतात्स्मरकोटिसमात् ।
प्रतिवल्लविकाभिमतात्सुखदात्
वसुदेवसुतान्न परं कलये ॥

Kala venu ravavasha gopa vadhu-
Shata koti vritat smara koti samat.
Prati vallavikabhimatat sukhadat
Vasudeva sutan na param kalaye.

6 अभिरामगुणाकर दाशरथे
जगदेकधनुर्धर धीरमते ।
रघुनायक राम रमेश विभो
वरदो भव देव दयाजलधे ॥

Abhirama gunakara Dasharathe
Jagad eka dhanurdhara dhira mate.
Raghu nayaka Rama Ramesha vibho
Varado bhava deva daya jaladhe.

7 अवनीतनयाकमनीयकरं
रजनीकरचारुमुखाम्बुरुहम् ।
रजनीचरराजतमोमिहरं
महनीयमहं रघुराममये ॥

Avani tanaya kamaniya karam
Rajanikara charu mukhamburuham.
Rajanichara raja tamo miharam
Mahaniyam aham Raghuramam aye.

8 सुमुखं सुहृदं सुलभं सुखदं
स्वनुजं च सुकायममोघशरम् ।
अपहाय रघूद्वहमन्यमहं
न कथञ्चन कञ्चन जातु भजे ॥

Sumukham suhridam sulabham sukhadam
Svanujam cha sukayam amogha sharam.
Apahaya Raghudvaham anyam aham
Na kathanchana kanchana jatu bhaje.

9 विना वेङ्कटेशं न नाथो न नाथः
सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे वेङ्कटेश प्रसीद प्रसीद
प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ॥

Vina Venkatesham na natho na nathah
Sada Venkatesham smarami smarami.
Hare Venkatesha prasida prasida
Priyam Venkatesha prayachchha prayachchha.

10 अहं दूरतस्ते पदाम्भोजयुग्म-
प्रणामेच्छयाऽऽगत्य सेवां करोमि ।
सकृत्सेवया नित्यसेवाफलं त्वं
प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश ॥

Aham duratas te padambhoja yugma-
Pranamechchhayagatya sevam karomi.
Sakrit sevaya nitya seva phalam tvam
Prayachchha prayachchha prabho Venkatesha.

11 अज्ञानिना मया दोषान्
अशेषान्विहितान् हरे ।
क्षमस्व त्वं क्षमस्व त्वं
शेषशैलशिखामणे ॥

Ajnanina maya doshan
Asheshan vihitan Hare.
Kshamasva tvam kshamasva tvam
Shesha shaila shikhamane.

PRAPATTI · श्रीवेङ्कटेशप्रपत्तिः

1 ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षःस्थलनित्यवासरसिकां तत्क्षान्तिसंवर्धिनीम् ।
पद्मालङ्कृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥

Ishanam jagatosya Venkata pater Vishnoh param preyasim
Tad vakshahsthala nitya vasa rasikam tat kshanti sanvardhinim.
Padmalankrita pani pallava yugam padmasanastham shriyam
Vatsalyadi gunojjvalam bhagavatim vande jagan mataram.

2 श्रीमन् कृपाजलनिधे कृतसर्वलोक
सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ।
स्वामिन् सुशील सुलभाश्रितपारिजात
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Shriman kripa jala nidhe krita sarva loka
Sarvajna shakta nata vatsala sarva sheshin.
Svamin sushila sulabhashrita parijata
Shri Venkatesha charanau sharanam prapadye.

3 आनूपुरार्पितसुजातसुगन्धिपुष्प-
सौरभ्यसौरभकरौ समसन्निवेशौ ।
सौम्यौ सदाऽनुभवनेऽपि नवानुभाव्यौ
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Anupurarpita sujata sugandhi pushpa-
Saurabhya saurabhakarau sama sanniveshau.
Saumyau sadanubhavanepi navanubhavyau
Shri Venkatesha charanau sharanam prapadye.

4 सद्योविकासिसमुदित्वरसान्द्रराग-
सौरभ्यनिर्भरसरोरुहसाम्यवार्ताम् ।
सम्यक्षु साहसपदेषु विलेखयन्तौ
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Sadyo vikasi samuditvara sandra raga-
Saurabhya nirbhara saroruha samya vartam.
Samyakshu sahasa padeshu vilekhayantau
Shri Venkatesha charanau sharanam prapadye.

5 रेखामयध्वजसुधाकलशातपत्र-
वज्राङ्कुशाम्बुरुहकल्पकशङ्खचक्रैः ।
भव्यैरलङ्कृततलौ परतत्त्वचिह्नैः
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Rekhamaya dhvaja sudha kalashatapatra-
Vajrankushamburuha kalpaka shankha chakraih.
Bhavyair alankrita talau para tattva chihnaih
Shri Venkatesha charanau sharanam prapadye.

6 ताम्रोदरद्युतिपराजितपद्मरागौ
बाह्यैर्महोभिरभिभूतमहेन्द्रनीलौ ।
उद्यन्नखांशुभिरुदस्तशशाङ्कभासौ
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Tamrodara dyuti parajita padmaragau
Bahyair mahobhir abhibhuta mahendra nilau.
Udyan nakhanshubhir udasta shashanka bhasau
Shri Venkatesha charanau sharanam prapadye.

7 सप्रेमभीति कमलाकरपल्लवाभ्यां
संवाहनेऽपि सपदि क्लममादधानौ ।
कान्तावदवाङ्मनसगोचरसौकुमार्यौ
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Sa prema bhiti kamala kara pallavabhyam
Sanvahanepi sapadi klamam adadhanau.
Kantav avan manasa gochara saukumaryau
Shri Venkatesha charanau sharanam prapadye.

8 लक्ष्मीमहीतदनुरूपनिजानुभाव-
नीलादिदिव्यमहिषीकरपल्लवानाम् ।
आरुण्यसंक्रमणतः किल सान्द्ररागौ
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Lakshmi mahi tad anurupa nijanubhava-
Niladi divya mahishi kara pallavanam.
Arunya sankramanatah kila sandra ragau
Shri Venkatesha charanau sharanam prapadye.

9 नित्यानमद्विधिशिवादिकिरीटकोटि-
प्रत्युप्तदीप्तनवरत्नमहःप्ररोहैः ।
नीराजनाविधिमुदारमुपादधानौ
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Nitya namad vidhi Shivadi kirita koti-
Pratyupta dipta nava ratna mahah prarohaih.
Nirajana vidhim udaram upadadhanau
Shri Venkatesha charanau sharanam prapadye.

10 विष्णोः पदे परम इत्युदितप्रशंसौ
यौ मध्व उत्स इति भोग्यतयाऽप्युपात्तौ ।
भूयस्तथेति तव पाणितलप्रदिष्टौ
श्रीवेङ्कटेशचरणौ शरणं प्रपद्ये ॥

Vishnoh pade parama ity udita prashansau
Yau madhva utsa iti bhogyataya py upattau.
Bhuyas tatheti tava pani tala pradishtau
Shri Venkatesha charanau sharanam prapadye.

11 पार्थाय तत्सदृशसारथिना त्वयैव
यौ दर्शितौ स्वचरणौ शरणं व्रजेति ।
भूयोऽपि मह्यमिह तौ करदर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

Parthaya tat sadrisha sarathina tvayaiva
Yau darshitau sva charanau sharanam vrajeti.
Bhuyopi mahyam iha tau kara darshitau te
Shri Venkatesha charanau sharanam prapadye.

12 मन्मूर्ध्नि कालियफणे विकटाटवीषु
श्रीवेङ्कटाद्रिशिखरे शिरसि श्रुतीनाम् ।
चित्तेऽप्यनन्यमनसां सममाहितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

Man murdhni Kaliya phane vikatatavishu
Shri Venkatadri shikhare shirasi shrutinam.
Chittepy ananya manasam samamahitau te
Shri Venkatesha charanau sharanam prapadye.

13 अम्लानहृष्यदवनीतलकीर्णपुष्पौ
श्रीवेङ्कटाद्रिशिखराभरणायमानौ ।
आनन्दिताखिलमनोनयनौ तवैतौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

Amlana hrishyad avani tala kirna pushpau
Shri Venkatadri shikharabharanayamanau.
Ananditakhila mano nayanau tavaitau
Shri Venkatesha charanau sharanam prapadye.

14 प्रायः प्रपन्नजनताप्रथमावगाह्यौ
मातुस्स्तनाविव शिशोरमृतायमानौ ।
प्राप्तौ परस्परतुलामतुलान्तरौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

Prayah prapanna janata prathamavagahyau
Matus stanav iva shishor amritayamanau.
Praptau paraspara tulam atulantarau te
Shri Venkatesha charanau sharanam prapadye.

15 सत्त्वोत्तरैस्सततसेव्यपदाम्बुजेन
संसारतारकदयार्द्रदृगञ्चलेन ।
सौम्योपयन्तृमुनिना मम दर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥

Sattvottarais satata sevya padambujena
Sansara taraka dayardra drig anchalena.
Saumyopayantri munina mama darshitau te
Shri Venkatesha charanau sharanam prapadye.

16 श्रीश श्रिया घटिकया त्वदुपायभावे
प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं
स्यां किङ्करो वृषगिरीश न जातु मह्यम् ॥

Shrisha shriya ghatikaya tvad upaya bhave
Prapye tvayi svayam upeyataya sphurantya.
Nityashritaya niravadya gunaya tubhyam
Syam kinkaro Vrishagirisha na jatu mahyam.

MANGALASHASANAM · श्रीवेङ्कटेशमङ्गलाशासनम्

1 श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥

Shriyah kantaya kalyana nidhaye nidhayerthinam.
Shri Venkata nivasaya Shrinivasaya mangalam.

2 लक्ष्मीसविभ्रमालोकसुभ्रूविभ्रमचक्षुषे ।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम् ॥

Lakshmi savibhramaloka subhru vibhrama chakshushe.
Chakshushe sarva lokanam Venkateshaya mangalam.

3 श्रीवेङ्कटाद्रिशृङ्गाग्रमङ्गलाभरणाङ्घ्रये ।
मङ्गलानां निवासाय वेङ्कटेशाय मङ्गलम् ॥

Shri Venkatadri shringagra mangalabharananghraye.
Mangalanam nivasaya Venkateshaya mangalam.

4 सर्वावयवसौन्दर्यसंपदा सर्वचेतसाम् ।
सदा संमोहनायास्तु वेङ्कटेशाय मङ्गलम् ॥

Sarvavayava saundarya sampada sarva chetasam.
Sada sammohanayastu Venkateshaya mangalam.

5 नित्याय निरवद्याय सत्यानन्दचिदात्मने ।
सर्वान्तरात्मने श्रीमद्वेङ्कटेशाय मङ्गलम् ॥

Nityaya niravadyaya satyananda chidatmane.
Sarvantaratmane Shrimad Venkateshaya mangalam.

6 स्वतस्सर्वविदे सर्वशक्तये सर्वशेषिणे ।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गलम् ॥

Svatas sarvavide sarva shaktaye sarva sheshine.
Sulabhaya sushilaya Venkateshaya mangalam.

7 परस्मै ब्रह्मणे पूर्णकामाय परमात्मने ।
प्रयुञ्जे परतत्त्वाय वेङ्कटेशाय मङ्गलम् ॥

Parasmai brahmane purna kamaya paramatmane.
Prayunje para tattvaya Venkateshaya mangalam.

8 आकालतत्त्वमश्रान्तमात्मनामनुपश्यताम् ।
अतृप्त्यमृतरूपाय वेङ्कटेशाय मङ्गलम् ॥

Akala tattvam ashrantam atmanam anupashyatam.
Atripty amrita rupaya Venkateshaya mangalam.

9 प्रायस्स्वचरणौ पुंसां शरण्यत्वेन पाणिना ।
कृपयाऽऽदिशते श्रीमद्वेङ्कटेशाय मङ्गलम् ॥

Prayas sva charanau punsam sharanyatvena panina.
Kripayadishate Shrimad Venkateshaya mangalam.

10 दयामृततरङ्गिण्यास्तरङ्गैरिव शीतलैः ।
अपाङ्गैः सिञ्चते विश्वं वेङ्कटेशाय मङ्गलम् ॥

Dayamrita taranginyas tarangair iva shitalaih.
Apangaih sinchate vishvam Venkateshaya mangalam.

11 स्रग्भूषाम्बरहेतीनां सुषमावहमूर्तये ।
सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गलम् ॥

Srag bhushambara hetinam sushamavaha murtaye.
Sarvarti shamanayastu Venkateshaya mangalam.

12 श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे ।
रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥

Shri Vaikuntha viraktaya svami pushkarini tate.
Ramaya ramamanaya Venkateshaya mangalam.

13 श्रीमत्सुन्दरजामातृमुनिमानसवासिने ।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥

Shrimat sundara jamatri muni manasa vasine.
Sarva loka nivasaya Shrinivasaya mangalam.

14 मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैस्सत्कृतायास्तु मङ्गलम् ॥

Mangalashasana parair mad acharya purogamaih.
Sarvaish cha purvair acharyais satkritayastu mangalam.

Text checked against: Sri Venkatesa Ashtottara-Sahasranama Stotrani (Suprabhata, Stotra, Prapatti, Mangalasasana sahita), Tirumala-Tirupati Devasthanams, Tirupati, 1969. Meanings, audio and all scripts at nityapaath.com/venkateswara-suprabhatam/